# वार्णादाङ्गं बलीयो भवतीति परिभाषाविचारः

**Dr. G.S.V. Dattatreya Murthy**
Assistant professor in Vyakarana
Department of Sanskrit & IC,
SCSVMV (Deemed to be ) Univeresity
Enathur, Kanchipuram - 631561

**प्रधानांशाः**

**परिभाषायाः अवतरणिका**

**परिभाषायाः ज्ञापकम्**

**ज्ञापकत्वविषये प्राचीनमतम्**

**नागेशमतम्**

**परिभाषार्थनिष्कर्षः**

**परिभाषाङ्गीकारे दोषः**

**समानस्थानिकत्वे एवैषा इति सिद्धान्तः**

**नियमस्वरूपम्**

**नियमस्वीकारेफलानि**

**व्याख्यतृणामाशयः**

**शब्दकौस्तुभकाराणामाशयः**

लोके इयाय इत्यादीनि रूपाणि दरीदृश्यन्ते। तथाहि- इण् धातोः लिटि तिपः णलादेशे, द्वित्वे, अभ्यासत्वे इ+इ+अ इति जाते उत्तरखण्डस्य अचोञ्णिति इति सूत्रेण वृद्धौ एचोऽयवायावः इत्यनेन आयादेशे च कृते इ+आय् इति जाते अभ्यासस्यासवर्णे इति इयङादेशे इयाय इत्यभीष्टरूपं सिध्यति।

**अत्रायं प्रश्नः**

इ+इ+अ इत्यवस्थायां कार्यद्वयं प्राप्नोति, सवर्णदीर्घः, वृद्धिश्च। सवर्णदीर्घस्तु अन्तरङ्गः, अन्तर्भूतनिमित्तकत्वात्। वृद्धिस्तावत् बहिरङ्गः, बहिर्भूतनिमित्तकत्वात्। यद्यन्तरङ्गपरिभाषा स्वीक्रियेत तदा इयाय इत्यादौ द्वित्वे कृते इ+इ+अ इत्यवस्थायां बहिरङ्गवृद्धिं बाधित्वा अन्तरङ्गत्वात् सवर्णदीर्घे ततः इयङि आय इत्यनिष्टरूपं भवेत्। अतः इयाय इत्याद्यभीष्टरूपसाधनार्थं परिभाषेयमारब्धा-वार्णादाङ्गं बलीयो भवतीति। वर्णस्य इदं वार्णम्। अङ्गस्य इदम् आङ्गम्। एवञ्च वर्णनिमित्तककार्यात् अङ्गाधिकारीयं कार्यं बलवदिति परिभाषार्थः। तेन इ+इ+अ इत्यवस्थायां सवर्णदीर्घस्य वार्णकार्यत्वात् वृद्धेः आङ्गत्वात् प्रथमतः वृद्धौ ततः इयङि इयाय इति अभीष्टरूपं सिध्यति।

**परिभाषायाः ज्ञापकत्वम्**

**अत्र प्राचीनाः**

अभ्यासस्यासवर्णे इति सूत्रे असवर्णग्रहणम् अस्याः ज्ञापकम्। तद्धि ईषतुः इत्यत्र इ+इष् इत्यवस्थायाम् इयङादेशव्यावृत्यर्थम्। वस्तुतः आलोच्यमाने अस्याः परिभाषायाः अभावे अन्तरङ्गेण सवर्णदीर्घेण बाधात् इयङः अप्राप्त्या असवर्णग्रहणं व्यर्थम्। व्यर्थं सत् इमां ज्ञापयति। ज्ञापिते तु आङ्गत्वेन इयङ्प्नोतीति तद्व्यावृत्यर्थं कृतमसवर्णग्रहणं चरितार्थं भवति।

**अयमत्र प्राचीनमतसारः**

प्राचीनानं मते अभ्यायस्य इत्येतस्य पदस्य इयाय इत्यादौ चारितार्थ्यं भवति।तथाहि- इ+इ+अ इत्यत्र चक्रकापत्तिः। प्रथमतः अचोञ्णिति इति सूत्रेण वृद्धिः प्राप्ता। तदपेक्षया च अन्तरङ्गत्वात् यङ्प्राप्नोति । परंतु केवलवर्णद्वयसापेक्षत्वेन अन्तरङ्गत्वात् इयङः पूर्वं सवर्णदीर्घः प्राप्नोति।तस्मिन् कर्तव्ये अन्तरङ्गनिमित्तविनाशकबहिरङ्गशास्त्रप्रवृत्तिसंभावनायाम् अन्तरङ्गं न प्रवर्तते, अथवा अन्तरङ्गशास्त्रीयनिमित्तविनाशकबहिरङ्गशास्त्रप्रवृत्तिसंभावनायां जातमन्तरङ्गं निवर्तते इत्यर्थिकया अकृतव्यूहपरिभाषया सवर्णदीर्घापेक्षया वृद्धिः प्राप्नोति। तदपेक्षया च अन्तरङ्गत्वात् इयङ् इति चक्रकापत्तिः। नवीनानां मते अकृतव्यूहपरिभाषाभावात् न चक्रकापत्तिः। किं तु सवर्णदीर्घ एव। प्राचीनमते प्राप्ता चक्रकापत्तिः वृद्धीयङोः समबलत्वेन वार्यते। सवर्णदीर्घं बाधित्वा अन्तरङ्गत्वात् वृद्धिः प्राप्ता इयङ् च। तत्र इयङः अभ्याससंज्ञा अङ्गसंज्ञा च आवश्यकी। वृद्धेस्तु अङ्गसंज्ञा परनिमित्तत्वं च। एवं च वृद्धीयङोः समबलत्वात् परत्वात् वृद्धौ ततः इयङि च इयाय इति रूपं सिध्यति। तथा इयेष इत्यत्र इ+इष्+अ इति स्थितौ सवर्णदीर्घइयङ्गुणेषु प्राप्तेषु अकृतव्यूहपरिभाषया गुणे इयङि च भवति तत्सिद्धिरिति अभ्यासस्येति चरितार्थमिति।

अत्र वाक्यार्थचन्द्रिकाकाराः

ईयतुः इत्यत्र दीर्घ इणः किति, इणो यण् इत्येतत्सूत्रविधेयाभ्यां दीर्घयणादेशाभ्यां प्रतिपदोक्तत्वेन बाधात् सवर्णदीर्घाप्रवृत्या यणः स्थानिवत्वेन प्रसङ्गस्य इयङः वारणाय आवश्यकत्वात् कथं तद्वैयर्थ्यमिति।

**समाधानम्**

अस्यामवस्थायां सवर्णदीर्घसमानकालिकत्वेन प्रसक्तस्य इयाङादेशस्य तक्रकौण्डिन्यन्यायमूलक चारितार्थ्योपबाधकत्वेनैव अभ्यासदीर्घेण प्रथमतः बाधनीयतया बाधप्रवृत्युत्तरं ईदृशेषु पुनः उत्सर्गप्रवृत्या नास्त्यसवर्णग्रहणस्य सार्थक्यसम्भवः। ननूभयोरपि परनिमित्तकत्वस्य तुल्यत्वात् कथं सवर्णदीर्घस्य अन्तरङ्गत्वमिति चेन्न। इयङुवङौ हि अभ्याससम्बन्धिनिमित्तकत्वात् बहिरङ्गौ। अतो न दोषः।

**अयमर्थः**

इयङुवङौ हि अङ्गनिमित्तकत्वेन बहिरङ्गौ। अतः तद्घटकसप्तम्यन्तोपात्तसवर्णाच्निमित्तकत्वेन सवर्णदीर्घः अन्तरङ्गः। अभ्याससम्बन्धिनिमित्तकत्वादिति पाठे तु इयङ्विधौ य्वोरित्यस्य अनुवृत्या तयोरेवस्थानित्वेन अभ्याससम्बन्धस्य निमित्ततायाः सुवचतया अन्तरङ्गत्वेन अभिमतसवर्णदीर्घसम्बन्धि पञ्चम्योपात्ताकरूपनिमित्तघटिताभ्यासनिमित्तत्वेन संख्याकृताधिकनिमित्तद्विकत्वेन वा इयङुवङोः बहिरङ्गत्वम्। इयङुवङोः अभ्याससंज्ञोत्तरं प्रवृत्या ततः प्रागेव सवर्णदीर्घप्राप्त्या पूर्वोपस्थितिनिमित्तकत्वरूपमन्तरङ्गं सवर्णदीर्घस्य। इयङुवङोस्तु परकालप्राप्तिकत्वेन बहिरङ्गत्वमिति तु न वक्तुं शक्यम्। सवर्णदीर्घस्यापि हलादिश्शेषोत्तरमेव प्राप्त्या तस्य च अभ्याससंज्ञाप्रवृत्तिमन्तरा दुर्लभत्वेन द्वयोरपि युगपदेव प्राप्तिः। वस्तुतः अस्य ग्रन्थस्य प्राचीनमतानुवादरूपत्वात् तन्मते संज्ञाकृतबहिरङ्गत्वस्य आश्रयणेन स्वरूपव्याक्रियैव पराक्रियेत्यभिप्रेत्य तदभिप्रायेणैव अयमुल्लेखः इति हरिशास्त्रिणामाशयः। मूले नचेयङादिरपवादो येन नाप्राप्तिन्यायेनेयर्तीत्यादिसकललक्ष्यप्राप्तयणपवादत्वस्यैव निर्णयादिति प्राञ्चः इति नागेशेनोक्तम्।

**तस्यायमर्थः**

अपवादेत्यस्य सवर्णदीर्घापवादः इत्यर्थः। प्रकृतलक्ष्ये तस्यावश्यं प्राप्तिः। यथा कुप्वोः कप्पौ च इति सूत्रं स्वीयोद्देश्यतावच्छेदकस्य विसर्जनीयस्य सः इत्यस्यैव बाधकं न तु शर्परे विसर्जनीयः इत्यस्य।एवमिदमपि स्वीयोद्देश्यतावच्छेदकव्यापकीभूतोद्देश्यतावच्छेदकस्य यणः एव बाधकं न तु सवर्णदीर्घस्यापि। तस्य स्वविषये इयर्तीत्यादौ अप्राप्तेरिति भावः। न च इयर्ति इत्यादौ ऋ+ऋ+ति इति स्थिते यणं बाधित्वा तक्रन्यायेन अर्तिपिपर्त्योश्च इतीत्वे पुनरुत्सर्गस्य यणः अप्रवृत्या न तस्यापि सकललक्ष्यप्राप्तिरिति वाच्यम्। तक्रन्यायेन बाधकस्थले न्यायानुरोधेन पुनरुत्सर्गस्य अप्रवृत्तावपि तत्प्राप्तेः दुर्निवारतया यणः इयङ्विषयीभूतसकललक्ष्यप्राप्तेः सुवचत्वात्। चारितार्थ्यमिति प्राचां मतं युक्तमिति वाच्यम्। इयाय इत्यत्र द्वित्वात्पूर्वं प्रवृत्ताया: वृद्धेः ए अ इत्यत्र दृष्टाया: इयेष इत्यत्र पूर्वं प्रवृत्तस्य लघूपधगुणस्य एष अ इत्यवस्थायां कृतस्य द्विर्वचनेचि इति रूपातिदेशेनापहारे अर्थात् वृद्धेः गुणस्य च पूर्वं यादृशं रूपमासीत् इकाररूपं तस्यानयनेन अथवा गुणवृध्यो: निषेधेन इ अ, इष् अ इति जाते द्वित्वे कृते पुन: प्राप्तौ वृद्धिगुणौ बाधित्वा अन्तरङ्गत्वात् सवर्णदीर्घापत्तेः। लभ्ये लक्षणं सकृदेव प्रवर्तते इति न्यायात् कथं गुणवृध्योः प्रवृत्तिरिति नालोचनीयम्। आगन्तूनामन्तेनिवेशः इति न्यायेन उत्तरखण्डस्य षाष्ठद्वित्वनिष्पन्नत्वात् अतिरिक्तत्वेन अदोषात्। अत: सम्पूर्णसूत्रस्यैव वैयर्थ्येन ज्ञापकत्वम्। ननु यन्निमित्तवैकल्यप्रयुक्ता विधीनामप्रवृत्तिः, तन्निमित्तसम्पादनार्थम् अतिदेशानां प्रवृत्तिः। चक्रे इत्यत्र च यणादेशोत्तरम् एकाच्त्वस्य

द्वित्वनिमित्तभूतस्याभावात्, द्वित्वप्रवृत्तये युक्तमतिदेशविषयत्वम्। प्रकृते सत्स्वपि गुणादिषु एकाच्त्वस्य अव्याघातात् कथमतिदेशप्रवृत्तिरिति चेत्, सत्यम्, द्वित्वविधौ एकाच्त्वमेव न निमित्तं, किं तु धातुत्वमपि। तस्य च गुणवृध्यादिभिः अन्यथाभूतेष्वतिदेशमन्तरा दुर्लभत्वात्, तद्वैकल्यप्रयुक्तायां द्वित्वशास्त्रप्रवृत्तौ अयमतिदेशः आश्रीयते। एकदेशविकृतन्यायेनात्र निर्वाहः इति नाशङ्कनीयम्। धातुत्वस्यापि द्रोणत्वादिवत् परिच्छिन्नपरिमाणधर्मतया, तादृशेन लोकन्यायेन अतिदेष्टुमशक्यत्वात्। न च इयर्ति इत्यादौ इयङादेशविधानाय सूत्रस्य चारितार्थ्यमिति वाच्यम्। तावन्मात्रप्रयोजनकत्वे इरिति न्यासेनैव सिद्धेः। न च तथान्यासे कृते अङ्गस्ये त्यस्य अचीत्यस्य च सम्बन्धेन ऋवर्णान्तस्य अङ्गस्य अचि परे इयङ् इत्यर्थे कर्तारौ इत्यादौ इयङापत्या फलभेदः स्यादिति वाच्यम्। अचिश्नुधातुभ्रुवाम्य्वोरियङुवङौ इति सूत्रात् य्वोरिनुवर्त्य उः इति न्यासस्य अर्तेः इवर्णस्य इयङ् इत्यर्थकरणेनैव इयर्ति इत्यादिसिद्धौ सम्पूर्णसूत्रस्य वैयर्थ्यस्य तादवस्थ्यात्। उः इति न्यासे उरिति ऋशब्दस्य षष्ठ्याः रूपम्। तथाच ऋवर्णस्य स्थाने यः इकार इत्यर्थ एव लभ्यते, न तु अर्तेः इवर्णस्येति। तथाच इयर्ति इत्यत्र पूर्वम् उरत् इत्यत्वे ततः अर्तिपिपर्त्योश्च इति अर्तेः अभ्यासतया अकारस्य इत्वेपि तस्य इकारस्य अकारस्थानिकतया ऋकारस्य स्थाने जातत्वाभावात् इ इति न्यासे इयङ् न स्यात्। एवञ्च इयर्ति इति न सिध्येदिति न वाच्यम्। इणो यण् इति सूत्रसाहचर्यात् ऋशब्दात् ङसि सिद्धेन उरिति पदेन ऋधातोः अर्थात् अर्तेरेव ग्रहणम्। न च ए, ऐ, ओ, औ शब्देभ्यः आचारक्विपि क्विपः सर्वापहारलोपे धातुसंज्ञायां लिटि द्वित्वे अभ्यासत्वे अभ्यासस्य ह्रस्वे इ+ ए+ अ, इ+ ऐ +अ, उ+ ओ +अ, उ+ औ+ अ इति स्थितिषु इयङ्विधानार्थं सूत्रं चरितार्थम्। तेन इयाय उवाव इत्यादि सिध्यतीति। एवं ओणृ अपनयने इत्यस्माद्धातोः कर्तरि ण्वुल्तृचौ इति ण्वुलि ओणकशब्दात् ओणकमिच्छतीत्यर्थे सुपः आत्मनः क्यच् इति क्यचि, क्यचि च इतीत्वे ओणकीय इत्यस्य धातुसंज्ञायां धातोः कर्मणः समानकर्तृकादिच्छायां वा इति सनि, सन्यङोः इति यथेष्टं नामधातुषु इति वार्तिकनियमेन वा प्रथमस्य एकाचः अर्थात् ओण् शब्दस्य द्वित्वे अभ्यासत्वे हलादिशेषे ह्रस्वे उ ओणकीय स इति स्थिते उवङादेशार्थं सूत्रं चरितार्थमिति, तेन सनः इटि धातुत्वे लटि तिपि उवोणकीयिषति इति सिध्यतीति वाच्यम्। षाष्ठप्रथमाह्निकस्थस्य दाश्वान् साह्वान् मीढ्वांश्च इति भाष्यप्रामाण्येन तेषाम् अनभिधानकल्पनात्। ए ऐ ओ औ शब्देभ्यः आचारक्विपः अनभिधानं वदव्रजहलन्तस्याचः इति सूत्रभाष्ये स्पष्टम्। तत्रहि अतो ल्रान्तस्य इति सूत्रात् अद्ग्रहणमनुवर्त्य वदव्रज्योरकारस्य अचश्च वृद्धिरित्येव सिद्धे हल्ग्रहणं जातिग्रहणर्थम्, तेन अराङ्क्षीत् इत्यादिसिद्धिः इत्युक्त्वा तत्राजन्तस्य इत्यर्थवारणाय हलग्रहणमित्याशङ्क्य अदन्ते लोपेन दीर्घान्ते फलाभावेन इगन्ते सिचिवृद्धिरित्यतः सिद्धत्वेन सन्ध्यक्षरान्तरस्य धातोरभावेन च फलाभावात् अजन्तस्येति नार्थः इत्युक्तम्, तथा च तेभ्यः क्विपः अभिधानं नास्तीति वाक्यार्थचन्द्रिकाकाराणामाशयः।

दाश्वान् शाह्वान् मीढ्वांश्च इत्यत्र भाष्ये द्विर्वचनात् प्रसारणत्वधात्वादिविकाररीत्वेत्वेत्वोत्व गुणवृद्धिविधयः इति वार्तिकं पठितम्। तत्र द्विर्वचनापेक्षया परत्वात् गुणवृद्धी विप्रतिषेधेन भवतः इति अंशस्य इयाय इययिथ इत्युदाहरणं दत्तं भाष्यकृता। तत्र भाष्यम् इदं तर्हि प्रयोजनं इयाय इययिथ। ननु चात्राप्यस्तु द्विर्वचनं, द्विर्वचने कृते परस्य गुणवृद्धी भविष्यतः। न सिध्यति अन्तरङ्गत्वात् सवर्णदीर्घत्वं प्राप्नोति। वार्णादाङ्गं बलीय इति। गुणवृद्धी भविष्यतः किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। आचार्यप्रवृत्तिर्ज्ञापयति वार्णादङ्गं बलीयो भवति। यदयम् अभ्यासस्यासवर्णे इत्यसवर्णग्रहणं करोति। कथं कृत्वा ज्ञापकम्, न ह्यन्तरेण गुणवृद्धी असवर्णपरोऽभ्यासो भवति। नैतदस्तिज्ञापकम्। अत्यर्थमेतत् स्यात्। इयृतः इयृथः उवोण उवोणिथ। यत्तर्हि दीर्घ इणः किति इति दीर्घत्वं शास्ति। एतस्याप्यस्ति वचने प्रयोजनम्। किम्। सवर्णदीर्घबाधनार्थमेतत् स्यात्। स यथैव तर्हि सवर्णदीर्घत्वं बाधते, एवं यणादेशमपि बाधेत। एवं तर्हि यणादेशे योगविभागः करिष्यते। इदमस्ति इणो यण् भवति। ततः एरनेकाचः एश्चानेकाच इणो यण् भवति। ततः असंयोगपूर्वस्य, एरनेकाच इत्येव। असवर्णग्रहणमेव तर्हि ज्ञापकम्। ननु चोक्तमत्यर्थमेतत् स्यादिति। नैकमुदाहरणं असवर्णग्रहणं प्रयोजयति। इति।

**परिभाषार्थनिष्कर्षः**

अवयवद्वारा सक्षाद्वा अङ्गमुद्दिस्य आदेशः आगमने वा कर्तव्ये वार्णकार्यम् अन्तरङ्गमपि न पूर्वं प्रवर्तत इति।

**अत्र शब्दकौस्तुभकारः**

सा च ज्ञाप्यमाना समानाश्रये युगपत्प्राप्तौ चेत्येवंरूपविशेषविषयैव लक्ष्यानुरोधेनेति प्राचां भावः। अत एव स्योन इत्यादि सिद्धम् इत्युक्तम्। यत्र ह्येकमेव निमित्तीकृत्य युगपदाङ्गवर्णयोः प्राप्तिः तत्र वार्णादाङ्गं बलीयः। यथा करोतिर्लिटि कृ अ इत्यवस्थायां गौरित्यत्र सावकाशां अचोञ्णिति इति वृद्धिं बाधित्वा अन्तरङ्गत्वात् प्राप्तं यणं वृद्धिरेव बाधते। अत्र किं प्रमाणमिति चेत् धर्मिग्राहकमानमेवेति गृहाणा इत्यप्ययुक्तम्। पुनश्चाग्रे उक्तं समानाश्रय इति प्राचां ग्रन्थाननुसृत्य प्रागुक्तं, तत्तु न क्षोदक्षमम्। व्याश्रयेष्वपि बहुधा तत्स्वीकारात्। तथाच कैयटेनासिद्धवत्सूत्रे शूनः इत्यत्र वार्णादाङ्गस्य बलीयस्त्वात् पूर्वैकादेशं बाधित्वा अल्लोप उक्तः। न च तत्रोभयोः अकारांशे समानाश्रयत्वमस्त्येवेति वाच्यम्। विश्नः, स्योनः इत्यत्रापि छकारेकारांशसाम्येन व्याश्रयत्वोपन्यासविरोधात्। किञ्च अङ्गस्य, आच्छीनद्योर्नुम्, शीङो रुट्, अचः परस्मिन् पूर्वविधौ, येन विधिस्तदन्तस्य, आडजादीनाम्, अजादेर्द्वितीयस्य अदस औ सुलोपश्च, सार्वधातुकमपित्, उपसर्गाद्ध्रस्व ऊहतेः, श्रुक्रमोरात्मनेपदे इत्यादि सूत्रेषु कैयटहरदत्तादिसकलग्रन्थाः समानाश्रयतां क्वचित् आदृत्य क्वचिदनादृत्य प्रवृत्ता इति स्पष्टमेव सिद्धान्तपरिशीलनम्। षाष्ठभाष्ये प्रथमाह्निकान्ते वार्णादाङ्गम् इति

परिभाषाया: प्रयोजनान्यपि व्याश्रयसाधारण्येव। न माङ्योगे इति सूत्रस्थ कैयटग्रन्थेप्येवमेव आतोनुपसर्गे क: इति सूत्रे भाष्येप्येवमेव। एवञ्च व्याश्रयसमानाश्रयशब्दयो: न भिन्नार्थसमर्पकता विभिन्ननिमित्तकत्वेपि समानकार्यित्वे एव प्रवृत्तिरित्यर्थ:। यथाकथमपि स्योन इत्यादि सिद्धये अनित्यत्वं स्वीक्रियते चेत् तेनैव निर्वाहे अङ्गसम्बन्धिन्याङ्गे समानकार्यित्वरूपे इत्यादिपरिष्कारा: अनावश्यका: इति हरिशास्त्रिणाम् आशय:। अङ्गमुद्दिश्य इति स्वीकारे हि कुल औ इत्यादौ नपुंसकाच्च इति विधीयमानस्य शीभावस्य प्रत्ययोद्देश्यकत्वात् अङ्गोद्देश्यकत्वाभावात् वार्णपरिभाषाया: अप्रवृत्ते: प्रथमं अन्तरङ्गवृद्धौ कुलौ इति अनिष्टापत्ति: कुले इतीष्यते।

इयं परिभाषा धर्मिग्राहकमानात् आङ्गवर्णयोः समानकार्यित्वे=समानस्थानिकत्वे एव प्रवर्तते। (धर्मी=परिभाषात्मकः, तद्ग्राहकं मानम्=अभ्यासस्यासवर्णे इति सूत्रम्)।तेन गाते इति रूपं सिध्यति। अन्याथा=धर्मिग्राहकमानादाङ्गवर्णयोः समानकार्यित्वे एव प्रवर्तते एवेति सङ्कोचस्वीकाराभावे तु भौवादिकात् गाङ्धातोः लटि आतामादेशे टेरेत्वे शपि गा+अ+आते इति जाते अनया परिभाषया अन्तरङ्गवार्णकार्यं सवर्णदीर्घं बाधित्वा आतोङितः इतीयादेशे गाते इति रूपासिद्धिः, सङ्कोचे कृते तु न दोषः, अतोङ्गात्परस्य ङितामाकारस्य इय्स्यादित्यर्थे आङ्गकार्यस्य स्थानी आतेघटकाकारः, वार्णकार्यस्य सवर्णदीर्घस्य च स्थानी गाघटकाकारः शपोघटकाकारश्चेति आङ्गवर्णयोः समानस्थानिकत्वाभावात् परिभाषायाः अप्रवृत्या पूर्वमन्तरङ्गत्वात् शपा सह सवर्णदीर्घे कृते ङितामाकारस्य आतेघटकाकारस्य अतः परत्वाभावात् आतोङितः इत्यस्य प्रवृत्तिर्नास्ति।

नन्वेवमपि ज्ञापितायां परिभाषायामपि इयाय इत्यादौ इयङ् दुर्वार एव, तत्र इयङादेशे कर्तव्ये अचः परस्मिन् पूर्वविधौ इति सूत्रेण गुणवृध्योः स्थानिवत्वेन सवर्णाच्परत्वात् असवर्णे इति प्रतिषेधादिति वाच्यम्, यदि सर्वत्र इयङादेशे कर्तव्ये स्थानिवद्भावः स्यात् अभ्यासस्यासवर्णे इति सम्पूर्णसूत्रमेव व्यर्थं स्यात्, अतः सूत्रारम्भसामार्थ्यात् स्थानिवत्वस्याप्रवृत्तिर्ज्ञाप्यते। तच्च सामान्यापेक्षं ज्ञापकम्। अभ्यासकार्ये कर्तव्ये तदुत्तरखण्डादेशस्य तत्कार्यप्रतिबन्धकीभूतं स्थानिवत्वं न इत्येवं रूपम्। प्रकृते इयाय इत्यत्र अभ्यासकार्ये कर्तव्ये=इयङादेशे कर्तव्ये, तदुत्तरखण्डादेशस्य =अभ्यासोत्तरखण्डादेशस्य=वृद्धेः, तत्कार्यप्रतिबन्धकीभूतं =अभ्यासकार्यप्रतिबन्धकीभूतं=इयङादेशकार्यप्रतिबन्धकीभूतं स्थानिवत्वं नेत्यर्थः।

**सङ्कोचस्वीकारे फलानि**

अभ्यासकार्ये कर्तव्ये तदुत्तरखण्डादेशस्य तत्कार्यप्रतिबन्धकीभूतं स्थानिवत्वं न इत्यादि सङ्कोच स्वीकारादेव 1.आरति इत्यत्र दीर्घः, 2.अरिरियात् इत्यत्र इयङ् सिध्यति। 1 आरति-तथाहि-ऋधातोः यङि,ऋ+य इति स्थिते सनाद्यन्ता धातवः इति सूत्रेण यङन्तस्य धातुसंज्ञायाम्, तस्य यङोचि च इत्यत्र चकारादच्प्रत्ययं विनापि लुकि, तस्य प्रत्ययलक्षणत्वेन यङन्ततवात् सन्यङोः इति सूत्रेण द्वित्वे ऋ+ऋ इति

जाते, पूर्वोभ्यासः इति सूत्रेण अभ्याससंज्ञायाम्, उरदत्वे,रपरत्वे अर्+ऋ इति जाते, हलादिश्शेषः इति सूत्रेण हलादिश्शेषे अ+ऋ इति जाते ऋतश्च इति सूत्रेण रकि अ+र्+ऋ इति जाते, प्रथमाबहुवचने झिप्रत्यये तिङ्शित्सार्वधातुकम् इति सूत्रेण सार्वधातुकसंज्ञायाम्, कर्तरि शप् इति सूत्रेण शपि, अदिप्रभृतिभ्यः शपः इति सूत्रेण शपः लुकि, तस्य अदभ्यस्तात् इति सूत्रेण अदादेशे अर्+ ऋ+ अति इति जाते, ऋकारस्य इको यणचि इति सूत्रेण यणादेशे रेफे अर् र्+अति इति जाते रोरि इति सूत्रेण रेफलोपे , ढ्रलोपे पूर्वस्य दीर्घोणः इति सूत्रेण अणः दीर्घे आरतीत्यभीष्टरूपं सिध्यति। यदि पूर्वोक्तसङ्कोचास्वीकारे तु दीर्घे कर्तव्ये यणः स्थानिवद्भावेन रेफपरत्वाभावात् रोरीत्यस्य रेफलोपनिमित्तकरेफाभावेन ढ्रलोपे पूर्वस्य दीर्घोणः इति दीर्घस्याप्रवृत्या रूपासिद्धिः।

2. अरिय्रियात् - ऋधातोः यङि, ऋ+य इति स्थिते सनाद्यन्ता धातवः इति सूत्रेण यङन्तस्य धातुसंज्ञायाम्, तस्य यङोचि च इत्यत्र चकारादच्प्रत्ययं विनापि लुकि, तस्य प्रत्ययलक्षणत्वेन यङन्तत्वात् सन्यङोः इति सूत्रेण द्वित्वे ऋ+ऋ इति जाते, पूर्वोभ्यासः इति सूत्रेण अभ्याससंज्ञायाम्, उरदत्वे,रपरत्वे अर्+ऋ इति जाते, हलादिश्शेषः इति सूत्रेण हलादिश्शेषे अ+ऋ इति जाते ऋतश्च इति सूत्रेण रिगागमे अरि+ऋ इति जाते, अरि+ऋ +याति इति स्थिते अभ्यास्यासवर्णे इति सूत्रेण इयङि इवर्णस्य इयङादेशे, लिङ्लकारे इतश्च इति सूत्रेण इकारलोपे, लिङाशिषि इति सूत्रेण तिपः आर्धधातुकसंज्ञायाम्, किदाशिषि इति सूत्रेण यासुडागमे अरियृ+यास्+त् इति जाते, सुट्तिथोः इति सूत्रेण सुडागमे ऋधातोः अरियृ+यास्+स्+त् इति जाते, रिङ्शयग्लिङ्क्षु इति सूत्रेण ऋकारस्य रिङादेशे अरिय्+रि+ यास्+स्+त् इति जाते स्कोसंयोगाद्योरन्ते च इति सूत्रेण सकारस्य संयोगादिलोपे अरिय्रियात् इत्यभीष्टरूपं सिध्यति। अरि+ऋ +याति इत्यवस्थायां रिङादेशे प्राप्ते, तं प्रबाध्य इयङि च प्राप्ते परत्वादृकारस्य रिङि तस्य स्थानिवद्भावेनासवर्णाच्परत्वं सम्पाद्य अभ्यासस्य इवर्णस्य इयङ् विधीयते। स्थानिवद्भावस्यानेन ज्ञापनेन निषेधो न जायते, तत्र ज्ञापनाकारे अभ्यासकार्यप्रतिबन्धकीभूतस्यैव स्थानिवत्वं नेति निवेशात्। अयं स्थानिवद्भावस्तु अभ्यासकार्यस्य इयङः साधकः न तु बाधकः।

वस्तुतस्तु परिशील्यमाने अरिर्यियात् इत्यत्र अन्तरङ्गत्वेन रिङादेशात्पूर्वमेव इयाङादेशः कर्तव्यः, अन्यथा तत्र रिङादेशस्य लोपोव्योर्वलि इति यलोपे कर्तव्ये अचः परस्मिन्निति सूत्रेण स्थानिवद्भावाप्राप्त्या रेफरूपवल्परत्वात् यलोपः स्यात्। अर्थात् पूर्वं रिङादेशे स्वीकृते रिङादेशकाले इयङः अभावात् यकारस्यासत्वेन रिङादेशस्थानिभूतात् ऋकाररूपादचः पूर्वत्वेन यकारस्य दृष्टत्वाभावात् स्थानिवत्वाप्रवृत्तिः स्पष्टैव। रिङादेशात्पूर्वं यदि इयङादेशः स्वीक्रियेत तदा रिङादेशकाले यकारस्य विद्यमानत्वेन स्थानिभूतादचः पूर्वत्वेन दृष्टतया तस्य लोपविधौ स्थानिवद्भावः प्राप्नोतीति। एवं च ज्ञापनाकारे तत्कार्यप्रतिबन्धकीभूतमिति

निवेशः न कर्तव्यः, तदभावेपि रूपसिद्धेः। अथ तत्कार्यप्रतिबन्धकीभूतमिति निवेशे अचकाणदितिरूपासिद्धिः। तथाहि-कण निमीलने इति चौरादिकात् धातोः णिचि, उपधावृद्धौ, धातुसंज्ञायाम्, लुङि, तिपि, अडागमे च्लेः चङि, द्वित्वे अभ्यासकार्ये अचकाणत्+ इ+ अत् इति स्थिते णौ चङ्युपधायाः इति ह्रस्वस्य काण्यादीनां वेति इति वार्तिकेन विकल्पेन विधानेन ह्रस्वाभावे णिलोपे अचकाणदिति सिध्यति। अत्राभ्यासस्य लघुपरत्वाभावेन सन्वद्भावाभावात् सन्यतः इतीत्वं, दीर्घोलघोः इति दीर्घश्च न भवतः। प्रतिबन्धकीभूतेति निवेशे तु अत्र स्थानिवत्वस्य अभ्यासकार्यसाधकत्वेन अत उपधायाः इति वृध्यायादेशस्य स्थानिवत्वेन लघुपरकत्वानयनात् सन्वद्भावे तन्मूलकेत्वदीर्घयोः प्रवृत्या विकल्पपक्षेपि अचीकाणत् इत्यनिष्टरूपमापद्येत। इष्यते तु अचकाणत् इति। तस्मात् पूर्वोक्तरीत्या तत्कार्यप्रतिबन्धकीभूतमिति निवेशः न कार्यः।

**समीक्षा**

इयर्ति इयेथ उवोण इत्याद्यार्थम् असवर्णग्रहणस्य आवश्यकत्वात् ज्ञापकत्वं न न्यायत उपपद्यते। क्लिष्टघटितं ज्ञापकत्वमिति स्पष्टमेव। फलानाम् अन्यथा सिद्धिरस्तिचेत् परिभाषैव त्यक्तुं शक्यते तत् परिशील्यते। नी अक इत्यादौ प्रकृतिप्रत्ययाश्रयात् वृद्धिः बहिरङ्गा, वर्णमात्राश्रितः यण् अन्तरङ्ग इति कल्पनमयुक्तम्। यणः निमित्तभूतवर्णावपि प्रकृतिप्रत्ययसम्बन्धिनौ एवेति अन्तरङ्गबहिरङ्गभावोऽत्र तुल्य एव। यथा अधि इ ल्यप् इत्यादौ पदद्वयसम्बन्धिवर्णापेक्षया सवर्णदीर्घः बहिरङ्गः इति प्रतिपादितं, तथा अत्रापि तादृश सम्बन्धवैशिष्ट्यं कल्पयितुं शक्यते। तत्र हि भिन्नपदसमभिव्याहारनिमित्तकल्यबाश्रितस्य तुकः बहिरङ्गत्वं कुतो न वर्ण्यते। तस्मात् ईदृशबहिरङ्गान्तरङ्गभावकल्पनैव दुर्व्यवस्थिता। एवम् ईषतुः ऊखतुरित्यादौ अपि सवर्णदीर्घस्य अभ्यासह्रस्वापेक्षया अन्तरङ्गत्वं दुर्वचम्। ऊखतुरित्यादावपि सवर्णदीर्घस्य अभ्यासह्रस्वापेक्षया अन्तरङ्गत्वं दुर्वचम्। अभ्याससम्बन्धित्वस्य अत्रापि सत्वात्। अत एव इथ एथ ए ए थ इति जाते अयादेशस्यापि अन्तरङ्गत्वं नास्ति। असवर्णग्रहणं च चरितार्थम्। सि उ न इत्यादौ तु अन्तरङ्गत्वं नास्ति। असवर्णग्रहणं च चरितार्थम्। सि उ न इत्यादौ तु अन्तरङ्गत्वं सुवचम्। इ इ णल् इत्यत्रापि अन्तरङ्गबहिरङ्गभावः दुर्घटः अन्तर्भूतबहिर्भतत्वस्य अभावात्। अध्यैयातामित्यत्रापि लावस्थायामाडाटौ इति पक्षः नास्ति, ततश्च आतां निमित्तकात् आटः अपेक्षया इयङन्तरङ्गः। तत आडुत्पत्तौ वृद्धिः। एवञ्च परबलीयस्त्वस्त्वेनैव वार्णपरिभाषा गतार्था।

**अत्रेदं बोध्यम्**

वार्णविधयः षष्ठे प्रथमपादे सन्ति। आङ्गाः षष्ठ्यन्ते सप्तमे च। तत्र यदा आङ्गकार्यं वार्णकार्यापेक्षया बहिरङ्गत्वं भजते तत्र बहिरङ्गासिद्धत्वं त्याज्यम् इति एतत्परिभाषायाः सम्पादनीयोऽर्थः। तच्च स्योनः इत्यादौ अनिष्टाय कल्पते। तस्मात् एतान् अनादृत्या अन्तरङ्गत्वं नाम किम् इति निर्दुष्टया रीत्या पुनर्व्यवस्थापनीयम्।

भाष्यविरोधः नास्ति। यतः वार्तिकदृष्ट्या अन्तरङ्गाणां भाष्यकारदृष्ट्या बहिरङ्गता आकरे दृश्यते। ततश्च ज्ञायते युक्तमिह द्रष्टव्यं किमन्तरङ्गं किं बहिरङ्गमिति इति भाष्यनिर्देशानुरोधेन प्रवर्तनीयं सुधीभिरिति। भाष्यकृता च तत्र तत्र विशकलनमार्गः प्रदर्शितः इत्येव।